# संस्कृतवार्ताः

**दिनाङ्क :- 27.05.2026** **प्रातः - 06:55**

**अथ वार्ताः**

**गृहमन्त्री-अमितशाहः**

केन्द्रेण अनुप्रवेशेन अन्यैः कारणैः च जनसाङ्ख्यिकीय-परिवर्तनस्य समाह्वानान् निवारणाय उच्च-स्तरीय-समित्याः निर्माणं विहितम्। सामाजिकान्तर्जालीये पटले, केन्द्रीय-गृह-मन्त्री अमितशाहः ह्यः अवदत् यत्, सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः प्रकाश-प्रभाकर-नावलेकरः समित्याः अध्यक्षः भविष्यति। जनगणना-आयुक्तेन सह पूर्व-आई. ए. एस. अधिकारी दुर्गा शङ्कर मिश्रा, पूर्व-आई. पी. एस. अधिकारी बालाजी श्रीवास्तवः, अर्थशास्त्री डॉ. शमिका रवि इत्येषा च समित्याः सदस्यरूपेण नियुक्तः अस्ति। गृहमन्त्रालयस्य संयुक्तसचिवः (एकः वैदेशीयः) समित्यां सदस्यसचिवरूपेण कार्यं करिष्यति।

**अमितशाह-ड्रोन**

गृहमन्त्रिणा अमितशाहेन उक्तं यत्, ड्रोन-यन्त्रैः मादकद्रव्याणां शस्त्राणां च तस्करणं निवारयितुं अग्रिमेषु षण्मासेषु एव सर्वकारः ड्रोन-अवरोध-प्रणाल्याः नियोजनं प्रचालयिष्यति। राजस्थानस्य बीकानेर-जनपदस्य साञ्चु-सीमा-पोस्ट् इत्यत्र बी.एस्.एफ्.-सैनिकान् सम्बोधयन्, सः अवदत् यत्, यद्यपि सीमपारात् उद्भूताः विभीषिकाः महत्त्वपूर्णानि एव सन्ति, तथापि देशस्य अन्तः एतादृशानां विभीषकाणां साहाय्यं कुर्वतां आन्तरिक-तत्त्वानाम् विषये अपि समानं ध्यानं दातव्यम्।

**आस्ट्रेलिया विदेश मन्त्रिणा-नवदिल्ल्यां**

आस्ट्रेलिया-देशस्य विदेश-मन्त्रिणा पेनी वोङ्गः इत्येषा ह्यः नवदिल्ल्यां प्रधानमन्त्रिना नरेन्द्रमोदिना सह मिलितवती। श्रीमोदी रक्षा-व्यापार-प्रौद्योगिकीत्यादिषु क्षेत्रेषु वर्धमानस्य भारत-आस्ट्रेलिया-व्यापक-सामरिकसहभागित्वस्य विषये अपि च आपूर्तिशृङ्खलायाः स्थितिस्थापकतायाः विषये अपि चर्चितवान्। प्रधानमन्त्री अवदत् यत्, भारतास्ट्रेलिया-देशौ स्वतन्त्रं, मुक्तं, सुरक्षितं, समृद्धं च हिन्द-प्रशान्त-क्षेत्रस्य कृते निरन्तरं कार्यं करिष्यतः। विदेश-मन्त्री डॉ. एस्. जयशङ्करः, सुश्री वोङ्ग इत्यनया सह सप्तदशतमस्य विदेश-मन्त्रिणां फ्रेमवर्क-संवादेत्यस्य सह-अध्यक्षतां कृतवान्। सामाजिकान्तर्जालीये पटले डा. जयशङ्करः अवदत् यत्, ते हिन्द-प्रशान्तप्रदेशे, पश्चिम-एशियायाः स्थितिं, अन्येषु क्षेत्रीय-वैश्विक-बहुपक्षीय-विषयेषु च मतानां आदानप्रदानं कृतवन्तः।

**नितिन नबीनः**

भाजपेति दलाध्यक्षः नितिन नबीनः ह्यः नवदिल्ल्याः दलस्य मुख्यालये 'नो बी.जे.पी.' इति उपक्रमस्य अन्तर्गतं द्वादश-देशानाम् अभियान-प्रमुखैः सह वार्तालापम् अकरोत्। श्री नबीनः ब्राजील्, जर्मनी, इण्डोनेशिया, मलेशिया, मारीशस्, न्यूजीलैण्ड, सेशेल्स, सिङ्गापुर, दक्षिण-आफ्रिका, श्रीलङ्का, थाईलैण्ड, वियतनाम् इत्यादीनां देशानां प्रतिनिधिनां स्वागतम् अकरोत् तथा च भाजपेति दलस्य यात्रायाः, विचारधारायाः, सङ्गठनात्मकशक्तेः, लोकसेवायाः प्रतिबद्धतायाः च विषये अवदत्।

**पियूष गोयलः**

केन्द्रीय वाणिज्योद्योग मन्त्री पियूष गोयलः दृढविश्वासं प्रकटितवान् यत् भारत-कनाडा-आर्थिकसहभागित्वस्य अग्रिमः अध्यायः विश्वासेन प्रेरितः भविष्यति, येन द्वयोः राष्ट्रयोः संयुक्त-समृद्धिः भविष्यति। गतरात्रौ कनाडादेशस्य टोरण्टो-नगरे 'राजनैतिक-पुनर्स्थापनात् वाणिज्यिक-वितरणपर्यन्तं' इति मन्त्रिस्तरीय-पूर्णसम्मेळनस्य उद्घाटनसत्रम् अभिसंबोधयन् श्रीगोयलः अवधानं दत्तवान् यत् उभयोः राष्ट्रयोः मध्ये विश्वासः व्यापारस्य निवेशस्य च नूतनान् अवसरान् उद्घाटयिष्यति।

**आई.पी.एल.**

आई. पी. एल. क्रिकेट्-क्रीडायां, गतरात्रौ धर्मशाला-नगरे क्वालिफ़ैयर्-वन्-क्रीडायां रायल-चैलेञ्जर्स-बेङ्गलुरु-दलेन गुजरात्-टाईटन्स्-दलं द्विनवति धावनाङ्कैः पराजितम्।

**।। इति वार्ता:।।**